

# हनुमत् पंचरत्नम्-वीताखिलविषयेच्छं जातानंदाश्रुपुलकमत्यच्छम्

https://www.chalisa.online

|| हनुमत्-पंचरत्नम् ||

वीताखिलविषयेच्छं जातानंदाश्रुपुलकमत्यच्छम्
सीतापति दूताद्यं वातात्मजमद्य भावये हृद्यम् ॥ 1 ॥
तरुणारुणमुखकमलं करुणारसपूरपूरितापांगम्
संजीवनमाशासे मंजुलमहिमानमंजनाभाग्यम् ॥ 2 ॥
शंबरवैरिशरातिगमंबुजदल विपुललोचनोदारम्
कंबुगलमनिलदिष्टं बिंबज्वलितोष्ठमेकमवलंबे ॥ 3 ॥
दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः
दारितदशमुखकीर्तिः पुरतो मम भातु हनुमतो मूर्तिः ॥ 4 ॥
वानरनिकराध्यक्षं दानवकुलकुमुदरविकरसदृशम्
दीनजनावनदीक्षं पवनतपः पाकपुंजमद्राक्षम् ॥ 5 ॥
एतत्पवनसुतस्य स्तोत्रं यः पठति पंचरत्नाख्यम्
चिरमिह निखिलान्भोगान्भुंक्त्वा श्रीरामभक्तिभाग्भवति ॥ 6 ॥

|| https://www.chalisa.online ||